## सः स्विदिस्वदिसहीनां च। (६२/२६२८)

स्विदि स्वदि सहि इत्येतेषां[1] ण्यन्तानां [2]सनि षभूते परतोऽभ्यासा[3]दुत्तरस्य सकारस्य सकारादेशो भवति। स्विदि – सिस्वेदयिषति। स्वदि – सिस्वादयिषति। सहि – सिसाहयिषति। सकारस्य सकारवचनं मूर्धन्यनिवृत्त्यर्थम्॥

## प्राक् सितादड्व्यवायेऽपि। (६३/२२७६)

[4]सेवसित (८.३.७०/२२७५) इति वक्ष्यति। प्राक् सितसंशब्दनाद् [5]यान् इत ऊर्ध्वमनुक्रमिष्यामः तत्र अड्व्यवायेऽपि मूर्धन्यो[6] भवति इत्येवं तद् वेदितव्यम्, अपिशब्दादनड्व्यवायेऽपि। वक्ष्यति – उपसर्गात् सुनोति-सुवति (८.३.६५/२२७०) इति षत्वम्। अभिषुणोति। परिषुणोति। [7]विषुणोति। निषुणोति। अभ्यषुणोत्। [8]पर्यषुणोत्। [9]व्यषुणोत्। न्यषुणोत्॥

## स्थादिष्वभ्यासेन चाभ्यासस्य। (६४/२२७७)

प्राक् सितात् इति वर्तते। [10]उपसर्गात् सुनोति (८.३.६५/२२७०) इत्यत्र स्थासेनयसेध इति स्थादयः, तेषु स्थादिषु प्राक् सितसंशब्दनात्[11] अभ्यासेन व्यवाये[12] मूर्धन्यो[13] भवति, अभ्याससकारस्य च भवति इत्येवं वेदितव्यम्। [14]अभ्यासेन व्यवाये अषोपदेशार्थं च अभिषिषेणयिषति, परिषिषेणयिषति। अवर्णान्ताभ्यासार्थं च अभितष्ठौ, परितष्ठौ। [15]षणि प्रतिषेधार्थं च अभिषिषिक्षति, परिषिषिक्षति। अभ्यासस्य इति वचनं नियमार्थम्, स्थादिषु एवाभ्याससकारस्य [16]मूर्धन्यो भवति, नान्यत्र। अभिसुसूषति। [17]अभिसिषासति॥

## उपसर्गात् सुनोतिसुवतिस्यतिस्तौतिस्तोभतिस्थासेनयसेधसिचसञ्जस्वञ्जाम्। (६५/२२७०)

[18]मूर्धन्य इति वर्तते, सः इति च। उपसर्गस्थान् निमित्तात् [19]उत्तरस्य सुनोति सुवति स्यति स्तौति स्तोभति स्था सेनय सेध सिच सञ्ज स्वञ्ज इत्येतेषां सकारस्य मूर्धन्यादेशो भवति। सुनोति – अभिषुणोति। परिषुणोति। अभ्यषुणोत्। पर्यषुणोत्। सुवति – अभिषुवति। परिषुवति। अभ्यषुवत्। पर्यषुवत्। स्यति – अभिष्यति। परिष्यति। अभ्यष्यत्। पर्यष्यत्। स्तौति – अभिष्टौति। [20]परिष्टौति। अभ्यष्टौत्। [21]पर्यष्टौत्। स्तोभति – [22]अभिष्टोभते। परिष्टोभते। अभ्यष्टोभत। पर्यष्टोभत। स्था -- अभिष्ठास्यति। परिष्ठास्यति। [23]अभ्यष्ठात्। पर्यष्ठात्। अभितष्ठौ। परितष्ठौ। सेनय -- अभिषेणयति। परिषेणयति। अभ्यषेणयत्।

---

1. धातूनां इत्यधिकम् ब. क. 2. षत्वभूते सनि क. इ. 3. इण उत्तरस्य ब. इ. ह. 4. सिवसितेति वक्ष्यति नास्ति क, परिनिविभ्यः सेवसित इ. 5. यत् क. 6. आदेशः इत्यधिकम् क. इ. 7. विषुणोति निषुणोति नास्ति इ. 8. पर्यषुणोत् नास्ति इ. 9. व्यषुणोत् नास्ति क. 10. उपसर्गात् नास्ति ब. 11. यान् इत ऊर्ध्वम् अनुक्रमिष्यामः इत्यधिकम् ब. 12. धातुसकारस्य इत्यधिकम् इ. 13. मूर्धन्यादेशः स्यात् ब. क. ह. 14. स्थादिषु इत्यधिकम् फ. 15. षत्वप्रतिषेधार्थम् क. 16. मूर्धन्यादेशः ब. क. इ. ह. 17. परिसिषासति इ. इत्यधिकम् फ. 18. वाक्यमिदं नास्ति क. 19. उत्तरेषां सुनोत्यादीनाम् क. 20–21. नास्ति ड. ह. 22. अभिष्टोभति परिष्टोभति इ. 23. अभ्यष्ठास्यत् पर्यष्ठास्यत् ड. ह.